# Lesson 28: Bhagavad Gītā Pages 413 - 415

1. सञ्जयः उवाच । मधुसूदनः तं, तथा कृपया आविष्टम्, अश्रु-पूर्ण-आकुल-ईक्षणं, विषीदन्तं, इदं वाक्यम् उवाच ।

2. श्रीभगवान् उवाच । अर्जुन, इदम् अनार्यजुष्टं, अस्वर्ग्यम्, अकीर्तिकरं कश्मलं विषमे त्वा कुतः समुपस्थितम् ।

3. पार्थ, क्लैब्यं मा स्म गमः, त्वयि न एतद् उपपद्यते । परन्तप, क्षुद्रं हृदय-दौर्बल्यं त्यक्त्वा उत्तिष्ठ ।

4. अर्जुनः उवाच । मधुसूदन अरिसूदन, अहं संख्ये पूजा-अर्हौ भीष्मं द्रोणं च कथम् इषुभिः प्रतियोत्स्यामि ।

5. महा-अनुभावान् हि गुरून् अहत्वा इह लोके भैक्ष्यम् अपि भोक्तुं श्रेयः । इह एव तु गुरून् हत्वा रुधिर-प्रदिग्धान् अर्थ-कामान् भोगान् भुञ्जीय ।

6. कतरद् यद् वा जयेम यदि वा नः जयेयुः नः गरीयः न च एतद् विद्मः । यान् एव हत्वा न जिजीविषामः, ते धार्तराष्ट्राः प्रमुखे अवस्थिताः ।

7. कार्पण्य-दोष-उपहत-स्वभावः, धर्म-सम्मूढ-चेताः त्वा पृच्छामि । यद् श्रेयः स्यात् तद् मे निश्चितं ब्रूहि, अहं ते शिष्यः, त्वां प्रपन्नं मां शाधि ।

8. यद् हि मम इन्द्रियाणां उच्छोषणं शोकं अपनुद्यात् (तद्) न प्रपश्यामि, भूमौ असपत्नम् ऋद्धं राज्यं सुराणाम् च अधिपत्यम् अवाप्य अपि ।

9. सञ्जयः उवाच । गुडाकेशः परन्तपः हृषीकेशं एवम् उक्त्वा, “न योत्स्ये” इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह ।

10. भारत, सेनयोः उभयोः मध्ये, प्रहसन् इव हृषीकेशः तम् विषीदन्तं इदं वचः उचाव ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

11. श्रीभगवान् उवाच । अशोच्यान् त्वम् अन्वशोचः, प्रज्ञावादान् च भाषसे । पण्डिताः गत-असून् अगत-असून् च न अनुशोचन्ति ।

---

12. अहं तु न जातु एव न आसम्, न त्वम्, न इमे जनाधिपाः । न च एव सर्वे वयं अतः परम् न भविष्यामः ।

---

13. यथा अस्मिन् देहे देहिनः कौमारं यौवनं जरा, तथा देह-अन्तर-प्राप्तिः, तत्र धीरः न मुह्यति ।

---

14. कौन्तेय, मात्रा-स्पर्शाः तु शीत-उष्ण-सुख-दुःख-दाः आगमापायिनः अनित्याः । भारत, तान् तितिक्षस्व ।

---

15. पुरुष-ऋषभ, एते हि यं सम-सुख-दुःखं, धीरं, पुरुषं न व्यथयन्ति,  सः अमृतत्वाय कल्पते ।

---

16. असतः भावः न विद्यते, सतः अभावः न विद्यते । उभयोः अपि अनयोः अन्तः तु तत्त्व-दर्शिभिः दृष्टः ।

---

17. येन सर्वम् इदं ततम्, तद् तु अविनाशि विद्धि । अस्य अव्ययस्य विनाशं कर्तुं न कश्चिद् अर्हति ।

---

18. नित्यस्य अनाशिनः अप्रमेयस्य शरीरिणः इमे देहाः अन्तवन्तः उक्ताः । भारत, तस्मात् युध्यस्व ।

---

19. यः एनं हन्तारं वेत्ति, यः च एनं हतं मन्यते, तौ उभौ न विजानीतः, अयं न हन्ति, न हन्यते ।

---

20. कदाचिद् न जायते म्रियते वा, अयं न भूत्वा भविता वा न भूयः । अयं अजः नित्यः शाश्वतः पुराणः, हन्यमाने शरीरे न हन्यते ।

---

21. यः एनं अविनाशिनं नित्यम् अजम् अव्ययं वेद, पार्थ सः पुरुषः कथं कं घातयति, कं हन्ति ।

---

22. यथा जीर्णानि वासांसि विहाय नरः अपराणि नवानि गृह्णाति, तथा जीर्णानि शरीराणि विहाय देही अन्यानि नवानि संयाति ।

---

23. शस्त्राणि एनं न छिन्दन्ति, पावकः एनं न दहति, आपः च एनं न क्लेदयन्ति, मारुतः न शोषयति ।

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

24. अयम् अच्छेद्यः, अयम् अदाह्यः, अक्लेद्यः, अशोष्यः एव च । अयं नित्यः सर्वगतः स्थाणुः अचलः सनातनः ।

---

25. अयम् अव्यक्तः, अयम् अचिन्त्यः, अयम् अविकार्यः उच्यते । तस्मात् एनं एवं विदित्वा अनुशोचितुं न अर्हसि ।

---

26. अथ च एनं नित्य-जातं नित्यं मृतं वा मन्यसे, महाबाहो तथापि त्वं एनं शोचितुं न अर्हसि ।

---

27. जातस्य हि मृत्युः ध्रुवः, मृतस्य च जन्म ध्रुवम् । तस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ।

---

28. भारत, भूतानि अव्यक्त-आदीनि, व्यक्त-मध्यानि, अव्यक्त-निधनानि एव । तत्र का परिदेवना ।

---

29. आश्चर्यवत् कश्चिद् एनं पश्यति, तथैव च आश्चर्यवत् अन्यः वदति, आश्चर्यवत् च अन्यः एनं शृणोति, कश्चिद् श्रुत्वा अपि न च एव एनं वेद ।

---

30. भारत, अयं देही सर्वस्य देहे नित्यम् अवध्यः । तस्मात् त्वं सर्वाणि भूतानि शोचितुं न अर्हसि ।

---

31. स्वधर्मम् अपि च अवेक्ष्य त्वं विकम्पितुं न अर्हसि । धर्म्यात् हि युद्धात् अन्यद् श्रेयः क्षत्रियस्य न विद्यते ।

---

32. यदृच्छया च उपपन्नम् अपावृतम् स्वर्गद्वारम् । पार्थ, ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते ।

---